"यः कामतो महापापं नरः कुर्य्यात् कथञ्चन । न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते" इति । तथा "विहितं यदकामानां कामात्तद्द्विगुणम्भवेदिति" च कामकृतेऽपि प्रायश्चित्तदर्शनात् । यत्तु वशिष्ठवचनम् तस्याप्यकामकृतेऽपराधे प्रायश्चित्तं शुद्धिकरमित्यभिप्रायः, न पुनः कामकृते प्रायश्चित्ताभाव इति । यत्तु मनुवचनम् "इयं विशुद्धिरुदितेत्यादि" तदपीयमिति सर्वनामपरामृष्टद्वादशवार्षिकव्रतचर्य्याया एव "कामतो ब्राह्मणबधे निष्कृतिर्न विधीयते" इत्यनेन प्रतिषेधो,न पुनः प्रायश्चित्तमात्रस्य, मरणान्तिकादेः प्रायश्चित्तस्य दर्शनात्। ननु यदि कामकृतेऽपि प्रायश्चित्तमस्ति तर्हि पापक्षयोऽपि कस्मान्न स्यादविशेषात् ? यदि पापक्षयोऽपि नास्ति तर्हि व्यवहार्य्यतापि कथम्भवति? उच्यते उभयत्र प्रायश्चित्ताविशेषः शास्त्रतोऽवगम्यते । अज्ञानकृते सर्व्वत्र पापक्षयः यत्र तु "ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसम्बन्धावगस्तेननास्तिकनिन्दितकर्म्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति" गौतमोक्तं महापातकादौ व्यवहार्य्यत्वं निषिद्धं तस्मिन् पतनीये कर्म्मणि कामतः कृते व्यवहार्य्यत्वमात्रं न पापक्षय इति । न च पापक्षयाभावे व्यवहार्य्यत्वमनुपपन्नम् । द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारविरोधिका च तत्रैकतरशक्तिविनाशेऽपि व्यवहारविरोधिकायाः शक्तेर्विनाशोनानुपपन्नस्तस्मात् पापानपगमेऽपि व्यवहार्य्यत्वं नानुपपन्नम् । यत्तु मनुवचनम् "अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः । कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनादिति" तदपि कामकृतेऽपि प्रायश्चित्तप्राप्त्यर्थं न पुनः पापक्षयप्रतिपादनपरम् । अपतनीये पुनः कामकृतेऽपि प्रायश्चित्तेन पापक्षयो भवत्येव ।"अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति । कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति" मनुस्मरणात् । पतनीयेऽपि कर्म्मणि कामकृते मरणान्तिकप्रायश्चित्ते कल्मषक्षयोभवत्येव फलान्तराभावात् । "नास्यास्मिन् लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु निर्हन्यत इत्यापस्तम्बस्मरणात्" इति।

**अव्यवहित** त्रि० वि+अव+धा–क्त न०त० । व्यवधानरहिते साक्षात्संबद्धे । "सिसाधयिषाविरहविशिष्टक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नेति" दीधितिः ।

**अव्यवहृत** त्रि० वि+अव+हृ–क्त न०त० । १अकृतव्यवहारे यस्य व्यवहारो न कृतः तस्मिन् भोगादिना २अदूषिते च

**अव्यसन** न० अभावे न०त० । १व्यसनाभावे न०ब० । व्यसनशून्ये। व्यसनानि च अष्टादश मनुना दर्शितानि यथा "दश कामसमुत्थानि तथाष्टौ क्रोधजानि च । व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् । कामजेषु प्रसक्तोहि व्यसनेषु महीपतिः । वियुज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु ॥ मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियोमदः । तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ द्वयोरप्येतयोर्मूलं यं सर्व्वे कवयोविदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ । पानमक्षाःस्त्रियश्चैव मृगया च यथाक्रमम् । एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे । दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे । क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा । सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः । पूर्व्वंपूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान्" ।

**अव्यसनिन्** त्रि० न०त० स्त्रियां ङीप् । व्यसनशून्ये

**अव्यस्त** त्रि० न व्यस्तः विक्षिप्तः विपर्य्यस्तः पृथग्भूतो वा । १अविक्षिप्ते २अविपर्य्यस्ते ३समस्ते च। [अव्ययादयोऽप्यत्र

**अव्याकुल** त्रि० न०त० । निराकुले स्वच्छन्दे स्वस्थे ।

**अव्याकृत** त्रि० वि+आ+कृ–क्त न०त० । वेदान्तमते अप्रकटीभूते १वीजरूपे जगत्कारणेऽज्ञाने २सांख्यादिमते प्रधाने च। 'तद्धेदं तर्ह्यव्याकृतमासीत्" श्रुतिः । "सदेव सौम्येदमग्रआसीत्" छा० उ० भा० "इदं नामरूपाभ्यामव्याकृतम्"

**अव्याज** पु० न० अभावे न०त० । १छलाभावे "इदं किलाव्याजमनोहरं वपुः" शकु० । अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता" मालवि०। न०ब० । २तच्छून्ये त्रि० व्याजस्य यथार्थभूतस्य वस्तुनः स्वरूपनिह्नवेन इतररूपेण प्रकाशार्थः व्यापारभेदः ।

**अव्यापक** त्रि० न०त०। १व्यापकभिन्ने २परिच्छिन्ने च। व्यापकस्य स्वाधिकरणनिष्ठाभावाप्रतियोगी तद्भिन्नस्तादृशाभावप्रतियोगी अव्यापकः यथा धूमो वह्नेरव्यापकः तस्य वह्न्यधिककरणे तप्तायःपिण्डे वर्त्तमानस्याभावस्य प्रतियोगित्वात् "अव्यापकविषयताशून्यत्वम्" सामा० गदा० ।

**अव्यापार** पु० अभावे न०त० । १व्यापाराभावे न०ब० । २व्यापारशून्ये। व्यापारश्च करणजन्यः क्रियाया अव्यवहितजनकः ।यथा प्रत्यक्षज्ञाने इन्द्रियसन्निकर्षः । सहि इन्द्रियादुत्पन्नः प्रत्यक्षं जनयन् व्यापारो भवति एवं छिदिक्रियायां दात्रच्छेद्यसंयोगः। तथा यागादौ अदृष्टम्,अनुमितौ परामर्शः,शाब्दबोधे पदार्थस्मरणम् इत्यादि यथायथ-